"याद्दशो परिषत् सीते ! दूतस्यायं तथाविधः ।
ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति ॥"

परिषच्च खलु द्विविधा, ज्ञानवती मूढ़परिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन सुहृत्परिषत्, उदासीनपरिषत्,प्रतिनिविष्टपरिषच्चेति । तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नायां मूढ़ायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते । मूढ़ायान्तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानमन्तरेणाप्यदीप्तयशसा महाजनद्विष्टेन सह जल्पो विधीयते । तद्विधेन च सह कथयता आविद्धदीर्घसूत्रसङ्कुलैर्वाक्यदण्डकैः कथयितव्यम् । अतिहृष्टं मुहुर्मुहुरुपहसता परं रूपयता च परिषदमाकारैर्ब्रुवतश्चास्य वाक्यावकाशो न देयः । कष्टशब्दञ्च ब्रुवन् वक्तव्यो नोच्यत इति । अथवा पुनर्हीना ते प्रतिज्ञेति पुनश्चाह्वयमानः प्रतिवक्तव्यः । परिसंवत्सरोभव शिक्षस्व तावत् । पर्य्याप्तमेतावत्ते । सकृदपि हि पारिक्षेपिकं निहतं निहतमाहुरिति । नास्य योगः कर्त्तव्यः कथञ्चिदप्येवं श्रेयसा सह विगृह्य वक्तव्यमित्याहुरित्येके । नत्वेवं ज्यायसा सह विग्रहं प्रशंसन्ति कुशलाः । प्रत्यवरेण तु सह समानाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यम् । अथवाप्युदासीनपरिषदि अनवधानश्रवणज्ञानविज्ञानोपधारणवचनशक्तिसम्पन्नायां कथयता चावहितेन परस्य साद्गुण्यदोषबलमवेक्षितव्यम् । समवेक्ष्य च यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत् अनाविष्कृतमयोगं कुर्व्वन् । यत्र त्वेनमवरं मन्येत तत्रैवैनमाशु निगृह्णीयात् ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥) परिषत्त्वं यथा, प्रायश्चित्तविवेके ।

"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥"

परिषदः, पुं, (परितः सीदतीति । परि+सद्+अच् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) पारिषदः । अनुचरः । इति भरतधृतद्विरूपकोषः ॥

परिषद्यः, पुं, (परिषदमर्हतीति । परिषद्+यत् ।) परिषद्वलः । इति भरतधृतद्विरूपकोषः ॥

परिषद्वलः, पुं, (परिषदस्यास्तीति । परिषद्+ "रजःकृष्यासुतिपरिषदो वलच् ।" ५ । २ । ११२ । इति वलच् ।) सभासदः । पारिषदः । इति शब्दरत्नावली ॥ (यथा, भट्टिः । ४ । १२ ।

"आतीनयालदीप्राश्रः सुत्वनः परिपूजयन् ।
परिषद्वलान्महाब्रह्मैराट नैकटिकाश्रमान् ॥")

परिष्कन्दः, त्रि, (परिष्कन्दतीति । परि+स्कन्दिरौ गतिशोषणयोः+पचाद्यच् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वम् ।) परिस्कन्दः । परपुष्टः । इत्यमरटीकायां रमानाथः ॥

परिष्कण्णः, त्रि, (परि+स्कन्द्+क्तः । दस्य तस्य च नः । "परेश्च ।" ८ । ३ । ७४ । इति षत्वे णत्वञ्च ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥

परिष्कारः, पुं, (परिष्क्रियतेऽनेन । परि+कृ+ "सम्परिभ्यां करोतौ भूषणे ।" ६ । १ । १३७ । इति सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) अलङ्कारः । इत्यमरः । २ । ६ । १०१ ॥ संस्कारः । शुद्धिः ॥

परिष्कृतः, त्रि, (परिष्क्रियते स्म इति । परि+कृ+क्तः । "सम्परिभ्यामिति ।" सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वञ्च ।) भूषितः । अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ वेष्टितः । इति हेमचन्द्रः ॥ आहितसंस्कारः । इति वेदिशब्दटीकायां भरतः ॥

परिष्कृतभूमिः, स्त्री, वेदिः । परिष्कृता यज्ञार्थं पशुबन्धनाय यज्ञपात्रासादनाय चाहितसंस्कारा भूमिः । इत्यमरभरतौ ॥

परिष्टोमः, पुं, (परितः स्तूयते नानावर्णवत्त्वादिति । स्तु+मन् । ततः षत्वम् । केचित्तु "परेःस्तौतिं प्रति अनुपसर्गत्वात् न षः ।" इत्युक्त्वा परिस्तोम इति कल्पयन्ति ।) परिस्तोमः । इत्यमरटीकायां स्वामी ॥

परिष्वङ्गः, पुं, (परिष्वञ्जनम् । परि+स्वञ्ज+घञ् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) आलिङ्गनम् । इत्यमरः । ३ । २ । ३० ॥ (यथा, गोः रामायणे । १ । ४ । ८८ ।

"अङ्गदप्रमुखानाञ्च हरीणां रामदर्शनम् ।
हनूमतः परिष्वङ्गो राघवेण महात्मना ॥")

परिसभ्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः ॥ परिषदः । सभासदः ॥

परिसरः,पुं,(परिसरन्त्यत्र । परि+सृ+ "पुंसीति ।" ३ । ३ । ११८ । इति घः ।) पर्य्यन्तभूः । नदीनगरपर्व्वतादेरुपान्तभूमिः । इत्यमरभरतौ ॥ (यथा, मेघदूते । ६६ ।

"मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारैर्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥")

मृत्युः । विधिः । इति मेदिनी । रे । २७६ ॥

परिसर्पः, पुं, (परि समन्तात् सर्पणम् । परि+सृप्+घञ् ।) परिक्रिया । परिजनादिना वेष्टनम् । समन्तात् सर्पणम् । इत्यमरभरतौ ॥ (सर्पविशेषः । यथा, सुश्रुते कल्पस्थाने ४ अध्याये । तत्र दर्व्वीकराः । "गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मः ॥" इति । कुष्ठविशेषः । यथा, तत्रैव निदानस्थाने ५म अध्याये । "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठचर्म्मदलं विसर्पः परिसर्पः सिध्म विचर्च्चिका किटिमं पामा रकसा चेति ॥")

परिसर्य्या,स्त्री,(परिसरणमिति । सृ गतौ+"परिचर्य्या परिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिं इति निपातनात् सिद्धम् ।) परीसारः । सर्व्वतोगमनम् । भूमौ सर्व्वतोभ्रमणम् । इति सर्व्वस्वम् ॥ अन्तसरणम् । इति केचित् । इत्यमरभरतौ ॥

परिस्कन्दः, पुं, (परिस्कन्दतीति । परि+स्कन्द+अच् । "परेश्च ।" ८ । ३ । ७४ । इति पक्षे षत्वाभावः ।) परपुष्टः । परेण प्रतिपालितः । इत्यमरः । २ । १० । १८ ॥

परिस्कन्नः, पुं, (परि+स्कन्द+क्तः । "परेश्च ।" ८ । ३ । ७४ । इति पक्षे षत्वाभावः ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥

परिस्तोमः, पुं, (परि स्तूयते प्रशस्यते नानावर्णवत्त्वात् । परि+स्तु+"अर्त्तिस्तुस्विति ।" मन् । यद्वा परिगतः स्तोमोऽत्र वर्णस्तोमत्वात् ।) गजपृष्ठस्थचित्रकम्बलः । इत्यमरः । २।८।४२ ॥ हातीर पिठेर झुल इति भाषा ॥

परिस्पन्दः, पुं, (परि+स्पन्द+अधिकरणे घञ् ।) कुसुमप्रकारादेः पत्रावल्यादेश्च रचना । इत्यमरः । २ । ६ । १३७ ॥ परिकरः । परिवारः । इति हेमचन्द्रः । ३ । ३७६ ॥ (भावे+घञ् ।) सर्व्वतोभावेन स्पन्दनञ्च ॥ (मर्द्दनम् । यथा, महाभारते । १ । १५४ । ८ ।

"अहमेनं हनिष्यामि प्रेक्षन्त्यास्ते सुमध्यमे ! ।
नायं प्रतिबलो भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")

परिस्पन्दनं, क्ली, (परि सर्व्वतोभावेन स्पन्द्यते इति । परि+स्पन्द+ल्युट् ।) सर्व्वतोभावेन कम्पनम् । यथा । कोऽपि परिस्पन्दनसाधनसाध्यः । यथा गमनादिः । कोऽप्यपरिस्पन्दनसाधनसाध्यः । यथा अवस्थानादिः । इति गोयीचन्द्रः ॥

परिस्पन्दमानः, त्रि, (परिस्पन्दते इति । परि+स्पन्द+शानच् ।) सर्व्वतोभावेन कम्पमानः । यथा । "अनवरतपरिस्पन्दमाना परिमितपवनादिपरमाणुक्तेतनसंयोगसन्तानान्तःपातिवस्तूनामविरतमेवोपरमात् ।" इति सामान्यलक्षणायां शिरोमणिः ॥

परिस्यन्दः, पुं, (परि+स्यन्द+भावे घञ् । अप्राणिकर्तृकत्वे वा षत्वम् ।) परिष्यन्दः । इत्यमरटीकायां भरतः ॥

परिस्रुत्, स्त्री, (परिस्रवतीति । परि+स्रु+क्विप् तुक् च ।) वरुणात्मजा । मदिरा । इत्यमरः । २ । १० । ३९ ॥ (यथा, अथर्व्ववेदे ।३।१२।७ ।

"एमां परिस्रुतः कुम्भ आदधः कलशैरगुः ॥"

सर्व्वतोभावेन चरिते त्रि । यथा, ऋग्वेदे । ८ । ३९ । १० ।

"त्वामापः परिस्रुतः परियन्ति स्वसेतवो नभन्तामन्यके समे ॥")

परिस्रुतः, त्रि, (परितः स्रूयते स्म । स्रु स्रवणे+ "गत्यर्थेति ।" ३ । ४ । ७२ । इति क्तः ।) स्रवयुक्तः । सर्व्वतोभावेन चरितः । इति मेदिनी । ते । २०६ ॥ (वारुणीशब्देऽस्या विवृतिर्ज्ञातव्या । यथा, यजुर्व्वेदे । २ । ३४ ।

"ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ॥")

परिस्रुता, स्त्री,(परितः स्रूयते स्मेति । परि+स्रु+ क्तः । स्त्रियां टाप् । अन्नादिभ्यः क्षरणेन जात-